# sharaNAgati gadyam

# શરણાગતિ ગદ્યમ્

## Document Information

Text title : Sharanagati Gadyam

File name : sharaNAgatigadyam.itx

Category : vishhnu, krishna, stotra, rAmAnuja, vishnu

Location : doc_vishhnu

Author : Ramanujacharya

Transliterated by : T. R. Chari trchari at hotmail.com

Proofread by : T. R. Chari, PSA easwaran

Description-comments : One of the three gadyam-s (gadyatrayam)

Latest update : January 5, 2000, February 11, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2022

*sanskritdocuments.org*

# શરણાગતિ ગદ્યમ્

॥ શ્રીમતે રામાનુજાય નમઃ ॥

॥ શરણાગતિ ગદ્યમ્ ॥

॥ શ્રીમતે રામાનુજાય નમઃ ॥

યો નિત્યમચ્યુતપદામ્બુજયુગ્મરુક્મ-
વ્યામોહતસ્તદિતરાણિ તૃણાય મેને ।
અસ્મદ્ગુરોર્ભગવતોઽસ્ય દયૈકસિન્ધોઃ
રામાનુજસ્ય ચરણૌ શરણં પ્રપદ્યે ॥

વન્દે વેદાન્તકર્પૂરચામીકરકરણ્ડકમ્
રામાનુજાર્યમાર્યાણાં ચૂડામણિમહર્નિશમ્ ॥

શ્રીરઙ્ગનાયિકારામાનુજસંવાદઃ ॥

શ્રીરામાનુજઃ

ભગવન્નારાયણાભિમતાનુરૂપસ્વરૂપરૂપગુણવિભવ
ઐશ્વર્યશીલાદ્યનવધિકાતિશય અસઙ્ખ્યેયકલ્યાણગુણગણાં પદ્મવનાલયાં
ભગવતીં શ્રિયં દેવીં નિત્યાનપાયિનીં નિરવદ્યાં દેવદેવદિવ્યમહિષીં
અખિલજગન્માતરમસ્મન્માતરમશરણ્યશરણ્યામનન્યશરણઃ
શરણમહં પ્રપદ્યે ॥

પારમાર્થિક ભગવચ્ચરણારવિન્દયુગળ
ઐકાન્તિકાત્યન્તિક પરભક્તિ પરજ્ઞાન
પરમભક્તિકૃત પરિપૂર્ણાનવરત નિત્યવિશદતમ અનન્યપ્રયોજન
અનવધિકાતિશયપ્રિય ભગવદનુભવજનિત અનવધિકાતિશય પ્રીતિકારિત
અશેષાવસ્થોચિત અશેષશેષતૈકરતિરૂપ નિત્યકૈઙ્કર્યપ્રાપ્ત્યપેક્ષયા
પારમાર્થિકી ભગવચ્ચરણારવિન્દશરણાગતિઃ
યથાવસ્થિતા અવિરતાઽસ્તુ મે ॥

શ્રીરઙ્ગનાયિકા

અસ્તુ તે । તયૈવ સર્વં સમ્પત્સ્યતે ॥

॥ શ્રીરઙ્ગનાથરામાનુજસંવાદઃ ॥

શ્રીરામાનુજઃ

અખિલહેયપ્રત્યનીકકલ્યાણૈકતાન ! સ્વેતરસમસ્તવસ્તુવિલક્ષણ
અનન્તજ્ઞાનાનન્દૈકસ્વરૂપ ! સ્વાભિમતાનુરૂપ એકરૂપ અચિન્ત્ય દિવ્યાદ્ભુત
નિત્યનિરવદ્ય નિરતિશય ઔજ્જ્વલ્ય સૌન્દર્ય સૌગન્ધ્ય સૌકુમાર્ય લાવણ્ય
યૌવનાદ્યનન્તગુણનિધિદિવ્યરૂપ !

સ્વાભાવિકાનવધિકાતિશય જ્ઞાનબલૈશ્વર્ય વીર્યશક્તિતેજસ્સૌશીલ્ય
વાત્સલ્ય માર્દવ આર્જવ સૌહાર્દ સામ્ય કારુણ્ય માધુર્ય ગામ્ભીર્ય ઔદાર્ય
ચાતુર્યસ્થૈર્યધૈર્યશૌર્યપરાક્રમસત્યકામસત્યસઙ્કલ્પકૃતિત્વ
કૃતજ્ઞતાદ્યસઙ્ખ્યેયકલ્યાણગુણગણૌઘમહાર્ણવ !

સ્વોચિતવિવિધવિચિત્રાનન્તાશ્ચર્યનિત્યનિરવદ્યનિરતિશયસુગન્ધ
નિરતિશયસુખસ્પર્શનિરતિશયૌજ્જ્વલ્યકિરીટમકુટચૂડાવતંસ
મકરકુણ્ડલગ્રૈવેયકહારકેયૂરકટકશ્રીવત્સકૌસ્તુભમુક્તાદામોદરબન્ધન
પીતામ્બરકાઞ્ચીગુણનૂપુરાદ્યપરિમિતદિવ્યભૂષણ !

સ્વાનુરૂપ અચિન્ત્યશક્તિશઙ્ખચક્રગદાસિશાર્ઙ્ગાદ્યસઙ્ખ્યેયનિત્યનિરવદ્ય
નિરતિશયકલ્યાણદિવ્યાયુધ !

સ્વાભિમતનિત્યનિરવદ્યાનુરૂપસ્વરૂપરૂપગુણવિભવૈશ્વર્ય
શીલાદ્યનવધિકાતિશયાસઙ્ખ્યેયકલ્યાણગુણગણશ્રીવલ્લભ !
એવમ્ભૂતભૂમિનીળાનાયક !

સ્વચ્છન્દાનુવર્તિસ્વરૂપસ્થિતિપ્રવૃત્તિભેદાશેષશેષતૈકરતિરૂપ
નિત્યનિરવદ્યનિરતિશયજ્ઞાનક્રિયૈશ્વર્યાદ્યનન્તકલ્યાણગુણગણ
શેષશેષાશનગરુડપ્રમુખનાનાવિધાનન્તપરિજનપરિચારિકાપરિચરિત
ચરણયુગળ !

પરમયોગિવાઙ્મનસાઽપરિચ્છેદ્યસ્વરૂપસ્વભાવસ્વાભિમત
વિવિધવિચિત્રાનન્તભોગ્યભોગોપકરણભોગસ્થાનસમૃદ્ધાનન્તાશ્ચર્યા-
નન્તમહાવિભવાનન્તપરિમાણનિત્યનિરવદ્યનિરતિશયશ્રીવૈકુણ્ઠનાથ !

સ્વસઙ્કલ્પાનુવિધાયિ સ્વરૂપસ્થિતિપ્રવૃત્તિ
સ્વશેષતૈકસ્વભાવ પ્રકૃતિ પુરુષ
કાલાત્મક વિવિધ વિચિત્રાનન્ત ભોગ્ય ભોક્તૃવર્ગ ભોગોપકરણ
ભોગસ્થાનરૂપ નિખિલજગદુદય વિભવ લયલીલ !

સત્યકામ! સત્યસઙ્કલ્પ ! પરબ્રહ્મભૂત ! પુરુષોત્તમ મહાવિભૂતે !
શ્રીમન્! નારાયણ! વૈકુણ્ઠનાથ !

અપારકારુણ્ય સૌશીલ્ય વાત્સલ્ય ઔદાર્ય ઐશ્વર્ય સૌન્દર્ય મહોદધે !
અનાલોચિતવિશેષ અશેષલોકશરણ્ય ! પ્રણતાર્તિહર !
આશ્રિતવાત્સલ્યૈકજલધે! અનવરતવિદિત નિખિલભૂતજાતયાથાત્મ્ય!
અશેષચરાચરભૂત નિખિલનિયમનનિરત! અશેષચિદચિદ્વસ્તુશેષિભૂત!
નિખિલજગદાધાર! અખિલજગત્સ્વામિન્! અસ્મત્સ્વામિન્! સત્યકામ!
સત્યસઙ્કલ્પ! સકલેતરવિલક્ષણ! અર્થિકલ્પક! આપત્સખ! શ્રીમન્!
નારાયણ! અશરણ્યશરણ્ય! અનન્યશરણઃ
ત્વત્પાદારવિન્દયુગળં શરણમહં પ્રપદ્યે ॥

અત્ર દ્વય(મનુસન્દેય)મ્ ।

“પિતરં માતરં દારાન્ પુત્રાન્ બન્ધૂન્ સખીન્ ગુરૂન્ ।
રત્નાનિ ધનધાન્યાનિ ક્ષેત્રાણિ ચ ગૃહાણિ ચ ॥

સર્વધર્માંશ્ચ સન્ત્યજ્ય સર્વકામાંશ્ચ સાક્ષરાન્ ।
લોકવિક્રાન્તચરણૌ શરણં તેઽવ્રજં વિભો! ॥ ”

“ત્વમેવ માતા ચ પિતા ત્વમેવ ત્વમેવ બન્ધુશ્ચ ગુરુસ્ત્વમેવ ।
ત્વમેવ વિદ્યા દ્રવિણં ત્વમેવ ત્વમેવ સર્વં મમ દેવદેવ ॥

પિતાઽસિ લોકસ્ય ચરાચરસ્ય ત્વમસ્ય પૂજ્યશ્ચ ગુરુર્ગરીયાન્ ।
ન ત્વત્સમોઽસ્ત્યભ્યધિકઃ કુતોઽન્યો લોકત્રયેઽપ્યપ્રતિમપ્રભાવ ! ॥ ”

“તસ્માત્ પ્રણમ્ય પ્રણિધાય કાયં પ્રસાદયે ત્વામહમીશમીડ્યમ્ ।
પિતેવ પુત્રસ્ય સખેવ સખ્યુઃ પ્રિયઃ પ્રિયાયાર્હસિ દેવ સોઢુમ્ ॥ ”

મનોવાક્કાયૈરનાદિકાલપ્રવૃત્ત અનન્ત અકૃત્યકરણ
કૃત્યાકરણ ભગવદપચાર
ભાગવતાપચાર અસહ્યાપચારરૂપ નાનાવિધ અનન્તાપચારાન્

આરબ્ધકાર્યાન્, અનારબ્ધકાર્યાન્, કૃતાન્, ક્રિયમાણાન્, કરિષ્યમાણાંશ્ચ
સર્વાન્ અશેષતઃ ક્ષમસ્વ ।

અનાદિકાલપ્રવૃત્તવિપરીતજ્ઞાનં, આત્મવિષયં કૃત્સ્નજગદ્વિષયં ચ,
વિપરીતવૃત્તં ચ અશેષવિષયં,
અદ્યાપિ વર્તમાનં વર્તિષ્યમાણં ચ સર્વં ક્ષમસ્વ ॥

મદીયાનાદિકર્મપ્રવાહપ્રવૃત્તાં, ભગવત્સ્વરૂપતિરોધાનકરીં,
વિપરીતજ્ઞાનજનનીં, સ્વવિષયાયાશ્ચ ભોગ્યબુદ્ધેર્જનનીં,
દેહેન્દ્રિયત્વેન ??
ભોગ્યત્વેન સૂક્ષ્મરૂપેણ ચ અવસ્થિતાં, દૈવીં ગુણમયીં માયાં,
“દાસભૂતઃ શરણાગતોઽસ્મિ તવાસ્મિ દાસઃ, ”
ઇતિ વક્તારં માં તારય ।

“તેષાં જ્ઞાની નિત્યયુક્તઃ એકભક્તિર્વિશિષ્યતે ।
પ્રિયો હિ જ્ઞાનિનોઽત્યર્થમહં સ ચ મમ પ્રિયઃ ॥

ઉદારાઃ સર્વ એવૈતે જ્ઞાની ત્વાત્મૈવ મે મતમ્ ।
આસ્થિતઃ સ હિ યુક્તાત્મા મામેવાનુત્તમાં ગતિમ્ ॥

બહૂનાં જન્મનામન્તે જ્ઞાનવાન્ માં પ્રપદ્યતે ।
વાસુદેવઃ સર્વમિતિ સ મહાત્મા સુદુર્લભઃ ॥”

ઇતિ શ્લોકત્રયોદિતજ્ઞાનિનં માં કુરુષ્વ ।

“પુરુષઃ સ પરઃ પાર્થ ! ભક્ત્યા લભ્યસ્ત્વનન્યયા ”,
“ભક્ત્યા ત્વનન્યયા શક્યઃ”, “મદ્ભક્તિં લભતે પરામ્”

ઇતિ સ્થાનત્રયોદિતપરભક્તિયુક્તં માં કુરુષ્વ ।

પરભક્તિપરજ્ઞાનપરમભક્ત્યેકસ્વભાવં માં કુરુષ્વ ।

પરભક્તિ પરજ્ઞાન પરમભક્તિકૃત પરિપૂર્ણાનવરત નિત્યવિશદતમ
અનન્યપ્રયોજન અનવધિકાતિશયપ્રિય ભગવદનુભવોઽહં, તથાવિધ
ભગવદનુભવજનિત અનવધિકાતિશય પ્રીતિકારિત અશેષાવસ્થોચિત
અશેષશેષતૈકરતિરૂપ નિત્યકિઙ્કરો ભવાનિ ।

શ્રીરઙ્ગનાથઃ
એવમ્ભૂત મત્કૈઙ્કર્યપ્રાપ્ત્યુપાયતયા અવક્લૃપ્તસમસ્તવસ્તુવિહીનોઽપિ,

અનન્ત તદ્વિરોધિપાપાક્રાન્તોઽપિ, અનન્ત મદપચારયુક્તોઽપિ,
અનન્ત મદીયાપચારયુક્તોઽપિ, અનન્ત અસહ્યાપચારયુક્તોઽપિ,
એતત્કાર્યકારણભૂત અનાદિ વિપરીતાહઙ્કાર વિમૂઢાત્મસ્વભાવોઽપિ,
એતદુભયકાર્યકારણભૂત અનાદિ વિપરીતવાસનાસમ્બદ્ધોઽપિ,
એતદનુગુણ પ્રકૃતિવિશેષસમ્બદ્ધોઽપિ,
એતન્મૂલ આધ્યાત્મિક આધિભૌતિક આધિદૈવિક સુખદુઃખ તદ્ધેતુ
તદિતરોપેક્ષણીય વિષયાનુભવ જ્ઞાનસઙ્કોચરૂપ મચ્ચરણારવિન્દયુગળ
એકાન્તિકાત્યન્તિક પરભક્તિ પરજ્ઞાન પરમભક્તિવિઘ્નપ્રતિહતોઽપિ,
યેનકેનાપિ પ્રકારેણ દ્વયવક્તા ત્વમ્,
કેવલં મદીયયૈવ દયયા, નિશ્શેષવિનષ્ટ
સહેતુક મચ્ચરણારવિન્દયુગળ એકાન્તિકાત્યન્તિક પરભક્તિ પરજ્ઞાન
પરમભક્તિવિઘ્નઃ, મત્પ્રસાદલબ્ધ મચ્ચરણારવિન્દયુગળ એકાન્તિકાત્યન્તિક
પરભક્તિ પરજ્ઞાન પરમભક્તિઃ, મત્પ્રસાદાદેવ સાક્ષાત્કૃત યથાવસ્થિત
મત્સ્વરૂપરૂપગુણવિભૂતિ લીલોપકરણવિસ્તારઃ, અપરોક્ષસિદ્ધ મન્નિયામ્યતા
મદ્દાસ્યૈકરસાત્મસ્વભાવાત્મસ્વરૂપઃ, મદેકાનુભવઃ, મદ્દાસ્યૈકપ્રિયઃ,
પરિપૂર્ણાનવરત નિત્યવિશદતમ અનન્યપ્રયોજન અનવધિકાતિશયપ્રિય
મદનુભવસ્ત્વં તથાવિધ મદનુભવજનિત અનવધિકાતિશય પ્રીતિકારિત
અશેષાવસ્થોચિત અશેષશેષતૈકરતિરૂપ નિત્યકિઙ્કરો ભવ ।

એવમ્ભૂતોઽસિ ।

આધ્યાત્મિક આધિભૌતિક આધિદૈવિક દુઃખવિઘ્નગન્ધરહિતસ્ત્વં
દ્વયમર્થાનુસન્ધાનેન સહ સદૈવં વક્તા યાવચ્છરીરપાતં
અત્રૈવ શ્રીરઙ્ગે સુખમાસ્વ ॥

શરીરપાતસમયે તુ કેવલં મદીયયૈવ દયયા અતિપ્રબુદ્ધઃ, મામેવાવલોકયન્,
અપ્રચ્યુત પૂર્વસંસ્કારમનોરથઃ, જીર્ણમિવ વસ્ત્રં સુખેન ઇમાં પ્રકૃતિં
સ્થૂલસૂક્ષ્મરૂપાં વિસૃજ્ય, તદાનીમેવ મત્પ્રસાદલબ્ધ મચ્ચરણારવિન્દયુગળ
એકાન્તિકાત્યન્તિક પરભક્તિ પરજ્ઞાન પરમભક્તિકૃત પરિપૂર્ણાનવરત નિત્ય
વિશદતમ અનન્યપ્રયોજન અનવધિકાતિશયપ્રિય મદનુભવસ્ત્વં તથાવિધ
મદનુભવજનિત અનવધિકાતિશય પ્રીતિકારિત અશેષાવસ્થોચિત
અશેષશેષતૈકરતિરૂપ નિત્યકિઙ્કરો ભવિષ્યસિ ॥

મા તેઽભૂદત્ર સંશયઃ ।

“અનૃતં નોક્તપૂર્વં મે ન ચ વક્ષ્યે કદાચન ।”
“રામો દ્વિર્નાભિભાષતે ।”
“સકૃદેવ પ્રપન્નાય તવાસ્મીતિ ચ યાચતે ।
અભયં સર્વભૂતેભ્યો દદામ્યેતદ્વ્રતં મમ ॥”
“સર્વધર્માન્ પરિત્યજ્ય મામેકં શરણં વ્રજ ।
અહં ત્વા સર્વપાપેભ્યો મોક્ષયિષ્યામિ મા શુચઃ ॥”
ઇતિ મયૈવ હ્યુક્તમ્ ।

અતસ્ત્વં તવ તત્ત્વતો મદ્જ્ઞાનદર્શનપ્રાપ્તિષુ નિઃસંશયઃ સુખમાસ્વ ॥

અન્ત્યકાલે સ્મૃતિર્યાતુ તવ કૈઙ્કર્યકારિતા ।
તામેનાં ભગવન્નદ્ય ક્રિયામાણાં કુરુષ્વ મે ॥

ઇતિ શ્રી ભગવદ્રામાનુજવિરચિતે ગદ્યત્રયપ્રબન્ધે શરણાગતિ ગદ્યમ્ ॥

સર્વં શ્રીકૃષ્ણાર્પણમસ્તુ

From Sri T. R. Chari’s Stotra
Proofread by PSA Easwaran

*sharaNAgati gadyam*
pdf was typeset on December 25, 2022

Please send corrections to *sanskrit@cheerful.com*